श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

विल्लूर् नडादूर् श्री करुणाकराचार्यस्वामिना विरचितम्

# ॥ श्रीवञ्जुलवल्लीवासुदेवसुप्रभातम् ॥

## (श्रीवञ्जुलवल्लीवासुदेवप्रपत्तिः श्रीवञ्जुलवल्लीवासुदेवमङ्गलम् च)

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

## विषयसूची

1 श्रीवञ्जुलवल्लीवासुदेवसुप्रभातम् ........ 2
2 श्रीवञ्जुलवल्लीवासुदेवप्रपत्तिः ........ 7
3 श्रीवञ्जुलवल्लीवासुदेवमङ्गल्म् ........ 9

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवञ्जुलवल्लीवासुदेवसुप्रभातम् ॥

श्रीवत्सवंशकलशोदधिकौस्तुभस्य
श्रीवासराघवगुरोस्तनयं ततश्च।
विद्या अवाप्य विबुधोत्तमतां दधानं
कुर्वे सदा हृदि गुरुं करुणाकराख्यम् ॥

कौसल्यासुप्रजा ! राम ! पूर्वा सन्ध्या प्रवर्तते।
उत्तिष्ठ नरशार्दूल ! कर्तव्यं दैवमाह्निकम् ॥ 1 ॥

उत्तिष्ठोत्तिष्ठ गोविन्द ! शिलागरुडवाहन !।
उत्तिष्ठ वञ्जुलाकान्त ! त्रैलोक्यं मङ्गलम् कुरु ॥ 2 ॥

मेधावितापसगृहे कलितावतारे !
मेधावितामपि जडेषु नतेषु दात्रि !।
मेधाव्यपीह दयितस्तव दर्शनेच्छुः
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ 3 ॥

हेमेति नाम दधती तव मातृताञ्च
सव्ये तु पार्श्व इह सा मणिमौक्तिकाख्या।
युष्मत्प्लवोत्सवरता वदति स्ववीच्या
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ 4 ॥

हेमेति नाम दधती तव या वयस्या
सा चैत्य तिष्ठति पुरस्तव दर्शनेच्छुः।

तस्याः प्रसादपरमे ! जगतां तथैव
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **5** ॥

श्रीशैलतुल्यसुषमो भगवान् स तार्क्ष्यः
शेषेण क्लृप्तकटको गुलिकेन चापि।
पाणी प्रसार्य शुभवेदगिराऽत्र वक्ति
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **6** ॥

वैखानसान्वयविभूषणतां वहन्तः
वेदागमादिनिधयो निजपाणिपद्मे।
पूजां विधातुमथ वामुपदाश्च सज्जाः
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **7** ॥

रामानुजाङ्घ्रिशरणाश्शुभमञ्जुवाचः
वेदान्तदेशिकसृताविव यादवेन्दोः।
गाथाः प्रबोधविषया दधतीह भक्त्या
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **8** ॥

ब्रह्मा विवाहसमये तव यः पुरोधाः
पार्श्वं त्वदीयमजहन्ननु दक्षिणं सः।
शुद्धिं पठत्यपि दिनस्य सभक्तिभूमा
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **9** ॥

सङ्कर्षणाख्यवपुषा भगवान् स एव
पार्श्वं स्वयं च तव दक्षिणमेत्य तिष्ठन्।
त्वद्दृष्टिपातमभिवाञ्छति रौहिणेयः
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **10** ॥

प्रद्युम्नसंज्ञवपुषा तव दक्षिणान्यं
पार्श्वं समेत्य परितिष्ठति देवि सोऽपि।
आद्यं कटाक्षमभिवाञ्छति ते प्रबोधे
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **11** ॥

नाम्नाऽनिरुद्ध इति यः करुणाऽनिरुद्धा
यस्यास्ति देवि विदिता स च वामपार्श्वे।
पिप्रीषति त्वदवलोकनपातमेषः
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **12** ॥

देवः परस्स पुरुषोत्तमनामधेयः
पार्श्वे विभाति तव वञ्जुलवल्लि ! देवी !।
ये सन्वते पुरु ननूत्तम एष तेषां
दृष्ट्या तदिच्छुरिह तद्व्रज सुप्रभातम् ॥ **13** ॥

रक्ताक्षचोलनृपतेर्मणिमन्दिरस्य
निर्मातुरत्र तव ताः कथितास्सुकीर्तीः।
त्वां श्रावयन्नुपगतः कलिहा सदारः
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **14** ॥

त्वद्वैभवं श्रुतिगणैः पठितं शठारिः
भाषाश्रुतेर्जगति यः प्रथितं चकार।
सोऽप्यक्षिपातमनघं प्रथमं तवेप्सुः
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **15** ॥

श्रीमान् चतुष्कविशिखामणिरेत्य देवि !
न्यस्याञ्जलौ तव नुतौ रतसत्कृती स्वे।
दिव्यां त्वदीयसुषमां पठतीह भक्त्या
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम् ॥ **16** ॥

त्वां वल्लिकेति कलहंसमृगीति केकी
चंपेति वंशयुगमप्यथ कुम्भयुग्मम्।
सद्विद्रुमं झषयुगं च निरूप्य नौति
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम्॥ **17**॥

श्रीभट्टनाथकुलशेखरभक्तिसार
भक्ताङ्घ्रिरेणुमुनिवाहनपूर्वकास्ते।
प्राप्ताः कविश्च मधुरोऽपि कवित्रयं तत्
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम्॥ **18**॥

रामानुजस्तव कवाटविमोक्षणस्य
त्वत्कन्दुकेतवलयध्वनिसंयुतस्य।
त्वत्सूक्तिवर्णितपदस्य दिदृक्षुरास्ते
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम्॥ **19**॥

श्रीमान् शठारिवचसां विवृतौ रतोऽयं
श्रीरम्यपूर्वकसुतापतिसंयमीन्दुः।
पार्श्वस्थदेशिकयुतोऽत्र नुनूषति त्वां
श्रीवञ्जुलाम्ब ! कमले ! तव सुप्रभातम्॥ **20**॥

श्रीश्रीनिवास परिपूर्ण सुगन्धगोत्र
श्रीवासुदेव कमितश्शुभ वञ्जुलायाः।
त्वत्सुप्रभातकविताश्रवणे रतोऽपि
कालं निशाम्य भगवन् भज सुप्रभातम्॥ **21**॥

श्रीशैलसारगरुडाञ्चितदिव्यदेश -
श्रीवासुदेवदयितापरसुप्रभातम्।
इत्थं प्रगे सुललितं पठतां नराणां
नित्यं सभक्ति सुदिनं वितनोति सूषाम्॥ **22**॥

श्रीश्रीनिवास परिपूर्ण सुगन्धगोत्र
    श्रीवासुदेव कमितश्शुभ वञ्जुलायाः।
त्वत्सुप्रभातकविताश्रवणे रतोऽपि
    कालं निशाम्य भगवन् भज सुप्रभातम्॥ 23॥

॥ इति श्रीवञ्जुलवल्लीवासुदेवसुप्रभातं समाप्तम्॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवञ्जुलवल्लीवासुदेवप्रपत्तिः ॥

सुशिलामयविग्रहपक्षिनुते
    कमलालयगे करुणाजलधे।
कलवञ्जुलवल्लि ! तवाङ्घ्रियुगं
    शरणं प्रवृणे परिपालय माम् ॥ 1 ॥

उपलाकृतिके विनतातनये
    निजवाहनतां ददता सह ताम्।
चतुराननवाहरतासुरथे
    भ्रमणं दधतीं प्रवृणे शरणम् ॥ 2 ॥

इव वायुसुतो विनतातनुजः
    तव दास्यमिहातनुते स्म परम्।
पतियोगकृते त्विति तं वरदं
    त्वमधाः करुणां कुरु मे च तथा ॥ 3 ॥

मणिमौक्तिकतीरविहाररते !
    शुभवञ्जुलवल्लि ! कृपावसते !।
पदयोः पतितं तनयं तव हे !
    परिपालय मामगतिं कमले ! ॥ 4 ॥

कमले ! कमलालयवासरते !
    गरुडे महतीं उपले करुणाम्।

दधतीमनिशं कलये हृदये
    मम रक्षणमातनुतात् भवती ॥ 5 ॥

परिपूर्णतया प्रथितो भगवान्
    तव पाणितलं परिगृह्य रमे।
अवने शरणं वरितुस्त्वरसे
    यदि ते वचनं स कथं जहितात् ॥ 6 ॥

अयि ! वञ्जुलवल्लि ! पतिस्तव मां
    तनुजं युवयोः पतितं पदयोः।
जहितात् स कथं गरुडांसधृतं
    अहिमेकमसौ कृतवान् हि पुरा ॥ 7 ॥

उपले विहगे सरतिस्स पतिः
    उपलेन समे चरणौ भजति।
मयि लालनमेष दधाति कथं
    न? विभुः पुरतस्तव देवि ! रमे ! ॥ 8 ॥

अथ चोलपतेः परिपालनतः
    परकालकवेः प्रथितं यशसाम्।
चयमेष कथं सकलं क्षणतो
    जहितान्न पतिर्विमुखो मयि चेत् ॥ 9 ॥

न शिलागरुडे ह्युपलत्वकथा
    कमितुस्तव वञ्जुलवल्लि भवेत्।
मनसीति च तं विशदं कथयेः
    परिपालयतादिति हे ! कमले ! ॥ 10 ॥

॥ इति श्रीवञ्जुलवल्लीवासुदेवप्रपत्तिः समाप्ता ॥

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीवञ्जुलवल्लीवासुदेवमङ्गलम् ॥

विस्मृत्य विरजातीरं मणिमुक्तातटे रतिम्।
दधद्भ्यां भवतादाभ्यां नित्यश्रीर्नित्यमङ्गलम्॥ 1 ॥

रक्ताक्षचोलभूपस्य रक्षणे सततं रतिम्।
दधद्भ्यां दैवताभ्यां स्यात् नित्यश्रीर्नित्यमङ्गलम्॥ 2 ॥

शिलादतनयादीनां प्रभौ प्रीतिं शिलामये।
दधद्भ्यां दैवताभ्यां स्यात् नित्यश्रीर्नित्यमङ्गलम्॥ 3 ॥

मेधाविमुनिचित्तस्थं चरणाम्बुजयोर्युगम्।
दधद्भ्यां दैवताभ्यां स्यात् नित्यश्रीर्नित्यमङ्गलम्॥ 4 ॥

वरदानपटौ तस्मिन् शिलावौ प्रीतिमद्भुताम्।
दधद्भ्यां दैवताभ्यां स्यात् नित्यश्रीर्नित्यमङ्गलम्॥ 5 ॥

वञ्जुलाम्बासमेताय वासुदेवाय दायिने।
वैनतेये परां शक्तिं नित्यश्रीर्नित्यमङ्गलम्॥ 6 ॥

सङ्कर्षणमुखै रूपैः पञ्चधा भवते पुरे।
सुगन्धगिरिनाम्नीह नित्यश्रीर्नित्यमङ्गलम्॥ 7 ॥

प्रस्तरश्रीखगारूढ ! परिपूर्ण ! रमापते !।
मेधावितनयाकान्त ! तुभ्यं भवतु मङ्गलम्॥ 8 ॥

चापे चापि तथा मीने चरते वीथिकास्विह।
तुलाहीनखगेन्द्रेण तुभ्यं भवतु मङ्गलम्॥ 9॥

श्रीमद्वञ्जुलवल्लीश ! शिलागरुडवाहन !।
सुगन्धनगरीवास ! भूयात्ते भूरिमङ्गलम्॥ 10॥

श्रियः कान्ताय कान्ताय कल्याणनिधयेऽर्थिनाम्।
सुगन्धगिरिवासाय श्रीनिवासाय मङ्गलम्॥ 11॥

॥ इति श्रीवञ्जुलवल्लीवासुदेवमङ्गलं समाप्तम्॥